# वैयाकरणसिद्धान्तकौमुदी

## हल्सन्धिप्रकरणम् (३)

# पुनरावर्तनम्

- श्चुत्वसन्धिः
  - स्तोः श्चुना श्चुः
  - शात्
- ष्टुत्वसन्धिः
  - ष्टुना ष्टुः
  - न पदान्तात् टोरनाम्
  - तोः षि
- जश्त्वसन्धिः
  - झलां जशोऽन्ते

# पुनरावर्तनम्

- अनुनासिकसन्धिः
  - यरोऽनुनासिकेऽनुनासिको वा
  - प्रत्यये भाषायां नित्यम्
- परसवर्णसन्धिः
  - तोर्लि

# ११८. उदः स्थास्तम्भोः पूर्वस्य (८.४.६१)

- पदत्रयम् ।
- 'अनुस्वारस्य ययि परसवर्णः' इत्यतः सवर्णः इत्यनुवर्तते ।
- उदः – पञ्चमी = उदः परयोः
- स्थास्तम्भोः – षष्ठी = स्थाधातोः स्तम्भधातोश्च स्थाने
- पूर्वस्य सवर्णः – प्रथमा = पूर्वसवर्णः आदेशः स्यात् ।
- उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात् ।

- 'आदेः परस्य' इति परिभाषया स्थास्तम्भोः आदेः सकारस्य पूर्वसवर्णः आदेशः ।
- स्थानी - सकारः । पूर्वसवर्णाश्च पञ्च – त्, थ्, द्, ध्, न् ।

| | | |
|---|---|---|
| स्थानम् | दन्ताः | दन्ताः |
| आभ्यन्तरप्रयत्नः | विवृतम् | स्पृष्टम् |
| बाह्यप्रयत्नाः | विवारः, श्वासः, घोषः | त्, थ् (विवारः, श्वासः, घोषः) |
| | महाप्राणः | थ् (महाप्राणः) |

- अत्र अघोषस्य महाप्राणस्य सस्य तादृश एव थकारः ।

उद्  + स्थानम्

उत्  स्थानम् ('खरि च' इति चर्त्वम् – ८.४.५५)

उत्  थ्  थानम् ('उदः स्थास्तम्भोः...' इति पूर्वसवर्णः – ८.४.६१)

उत्  थानम्  ('झरो झरि सवर्णे' - ८.४.६५ – इति थकारस्य वा लोपः)

१. उत्थानम्

२. उत्थ्थानम् (लोपाभावे)

उद् + स्तम्भनम्

उत् स्तम्भनम् ('खरि च' इति चर्त्वम् – ८.४.५५)

उत् थ् तम्भनम् ('उदः स्थास्तम्भोः...' इति पूर्वसवर्णः – ८.४.६१)

उत् तम्भनम् ('झरो झरि सवर्णे' - ८.४.६५ – इति थकारस्य वा लोपः)

१. उत्तम्भनम्

२. उत्थ्तम्भनम् (लोपाभावे)

लोपाभावपक्षे तु थकारस्यैव श्रवणम् । न तु 'खरि च' इति चर्त्वम् । चर्त्वं प्रति थकारस्य असिद्धत्वात् ।

# ११९. झयो होऽन्यतरस्याम् (८.४.६२)

- पदत्रयम् । झयः, हः, अन्यतरस्याम् ।
- 'अनुस्वारस्य ययि परसवर्णः' इत्यतः सवर्ण इति, 'उदः स्थास्तम्भोः पूर्वस्य' इत्यतः पूर्वस्येति चानुवर्तते ।
- झयः – पञ्चमी = झयः परस्य
- हः – षष्ठी = हकारस्य
- पूर्वस्य सवर्णः – प्रथमा = पूर्वसवर्णः स्यात्
- अन्यतरस्याम् = विकल्पेन
- झयः परस्य हस्य पूर्वसवर्णो वा स्यात् ।

- घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृशो वर्गचतुर्थ एव आदेशः ।
- वाग् + हरिः = वाग्घरिः / वाग्हरिः ।

# १२०. शश्छोऽटि (८.४.६३)

- पदत्रयम् । शः, छः, अटि ।
- 'झयो होऽन्यतरस्याम्' इत्यतः 'झयः' इति अनुवर्तते । 'वा पदान्तस्य' इत्यतः वा इति च ।
- झयः – पञ्चमी = झयः परस्य
- शः – षष्ठी = शकारस्य स्थाने
- अटि – सप्तमी = अटि परे
- छः – प्रथमा = छकारः स्यात्
- पदान्तात् झयः परस्य शस्य छः वा स्याद् अटि ।

- तत् + शिवः
- तद् + शिवः ('झलां जशोऽन्ते' – ८.२.३९ – इति जश्त्वम् )
- तज् + शिवः ('स्तोः श्चुना श्चुः' – ८.४.४० – इति दकारस्य श्चुत्वम्)
- दस्य चुत्वेन जकारे कृते,

# १२१. खरि च (८.४.५५)

- पदद्वयम् ।
- ’झलां जश् झशि’ इत्यतः झलाम् इति, ’अभ्यासे चर्च’ इत्यतः ’चर्’ इति च अनुवर्तते ।
- खरि – सप्तमी = खरि परे
- झलाम् – षष्ठी = झल्-वर्णानां स्थाने
- चर् – प्रथमा = चर्-वर्णाः आदेशाः स्युः
- खरि परे झलां चरः स्युः ।

तज् + शिवः

तच् + शिवः ('खरि च' इति चर्त्वम् )

| | | | | |
|---|---|---|---|---|
| त | च् | श् | इ | वः |
| | पदान्ते झय् | शकारः | अट् | |
| त | च् | छ् | इ | वः |

तच्छिवः / तच्शिवः

- तत् + शिवः
- तद् + शिवः ('झलां जशोऽन्ते' – ८.२.३९ – इति जश्त्वम् )
- तज् + शिवः ('स्तोः श्चुना श्चुः' – ८.४.४० – इति दकारस्य श्चुत्वम्)
- तच् + शिवः ('खरि च' – ८.४.५५ – इति जकारस्य चर्त्वम्)
- तच् + छिवः ('शश्छोऽटि' – ८.४.६३ – इति छत्वम्)

# छत्वममीति वाच्यम् (वा)

- ’शश्छोऽटि’ इति सूत्रे ’अटि’ इत्यस्य स्थाने ’अमि’ इति वक्तव्यम् ।
- तत् + श्लोकेन
- तद् + श्लोकेन
- तज् + श्लोकेन
- तच् + श्लोकेन

| | | | | |
|---|---|---|---|---|
| त | च् | श् | ल् | ओकेन |
| | पदान्ते झय् | शकारः | अम् | |
| त | च् | छ् | ल् | ओकेन |

- तच्छ्लोकेन / तच्श्लोकेन

- अमि किम्?
- वाक् + श्च्योतति
- वा क् श् च् योतति
- पदान्ते झय् शकारः न अम्
- छत्वं न भवति ।

# १२२. मोऽनुस्वारः (८.३.२३)

- पदद्वयम् । मः, अनुस्वारः ।
- पदस्य (८.१.१६) इति अधिक्रियते ।'हलि सर्वेषाम्' (८.३.२२) इत्यतः 'हलि' इति अनुवर्तते ।
- मः पदस्य – षष्ठी = मकारान्तस्य पदस्य (येन विधिस्तदन्तस्य)
- हलि – सप्तमी = हलि परे
- अनुस्वारः – प्रथमा = विधेयः = अनुस्वारः स्यात्
- मान्तस्य पदस्य अनुस्वारः स्याद्धलि ।
- 'अलोऽन्त्यस्य' इति परिभाषया अन्त्यस्य मकारस्य स्थाने अनुस्वारः ।

- हरिम् + वन्दे = हरिं वन्दे
- पदस्य इति किम्?
- गम्+य+ते = गम्यते
- अपदान्तत्वात् न अनुस्वारः ।

# १२३. नश्चापदान्तस्य झलि (८.३.२४)

- चत्वारि पदानि । नः, च, अपदान्तस्य, झलि ।
- 'मोऽनुस्वारः' इत्यतः मः इति, अनुस्वारः इति च अनुवर्तते ।
- अपदान्तस्य – षष्ठी = पदस्य मध्ये विद्यमानस्य
- नः मः च – षष्ठी = नकारस्य मकारस्य च स्थाने
- झलि – सप्तमी = झल्-वर्णे परे
- अनुस्वारः – प्रथमा = विधेयः = अनुस्वारः स्यात्
- नस्य मस्य च अपदान्तस्य झलि अनुस्वारः ।

- यशान् + सि = **यशांसि ।**
- आक्रम् + स्यते = **आक्रंस्यते ।**
- **झलि किम्?**
- मन्+यते = **मन्यते ।**
- नम्+यते = **नम्यते ।**

# १२४. अनुस्वारस्य ययि परसवर्णः (८.४.५८)

- पदत्रयम् ।
- अनुस्वारस्य – षष्ठी = अनुस्वारस्य स्थाने
- ययि – सप्तमी = यय्-वर्णे परे
- परसवर्णः – प्रथमा = विधेयः = परसवर्णः आदेशः स्यात्
- स्पष्टम् ।
- नासिकास्थानसाम्यात् वर्गाणां पञ्चमवर्णाः अनुस्वारस्य आदेशा भवन्ति

- अं + कितः = अङ्कितः
- अं+चितः = अञ्चितः
- कुं+ठितः = कुण्ठितः
- शां+तः = शान्तः
- गुं+फितः = गुम्फितः

- कुठि प्रतिघाते
- कुठ्
- 'इदितो नुम् धातोः' ७.१.५८ – इति 'नुम्' आगमः
- 'मिदचोऽन्त्यात्परः' इति परिभाषया अन्त्यादचः परः नुमागमः ।
- कु न् ठ्
- कु न् ठ्    त ('निष्ठा' ३.२.१०२ – इति भूते क्त-प्रत्ययः)
- 'आर्धधातुकस्येड् वलादेः' ७.२.३५ – इति 'इट्' आगमः
- 'आद्यन्तौ टकितौ' इति परिभाषया प्रत्ययस्य आदौ इडागमः
- कु न् ठ् इ त
- कुं ठ् इ त ('नश्चापदान्तस्य झलि' इति नकारस्य अनुस्वारः)
- कुण्ठित ('अनुस्वारस्य ययि परसवर्णः' इति अनुस्वारस्य स्थाने टवर्गपञ्चमाक्षरः णकारः)

- ’शम उपशमे’
- शम्              त (’निष्ठा’ ३.२.१०२ – इति भूते क्त-प्रत्ययः)
- ’अनुनासिकस्य क्विझलोः’ इति अनुनासिकान्तस्य दीर्घः
- ’अचश्च’ इति परिभाषया शकारात्परस्य अकारस्य दीर्घः
- शाम्              त
- शां  त (’नश्चापदान्तस्य झलि’ इति मकारस्य अनुस्वारः)
- शान्त (’अनुस्वारस्य ययि परसवर्णः’ इति अनुस्वारस्य स्थाने तवर्गपञ्चमाक्षरः नकारः)

- डुकृञ् करणे
- लटि प्रथमपुरुषबहुवचने ’कुर्वन्ति’ इति रूपम् ।
- ’अट्कुप्वाङ्नुम्व्यवायेऽपि’ इति रेफं निमित्तीकृत्य नकारस्य णत्वं प्राप्नोति

- नश्चापदान्तस्य झलि – ८.३.२४
- अट्कुप्वाङ्नुम्व्यवायेऽपि – ८.४.२
- अनुस्वारस्य ययि परसवर्णः – ८.४.५८

- कुर्वन् ति
- आदौ णत्वस्य असिद्धत्वात् अनुस्वारः क्रियते ।
- कुर्वं ति (नश्चापदान्तस्य झलि – ८.३.३४)
- अधुना नकारस्य अभावेन णत्वस्य प्राप्तिः नास्ति ।
- कुर्वन् ति (अनुस्वारस्य ययि परसवर्णः – ८.४.५८)
- अधुना नकारस्य सत्त्वेऽपि तस्य असिद्धत्वात् णत्वं न ।
- 'कुर्वन्ति' इत्यत्र णत्वे प्राप्ते तस्य असिद्धत्वाद् अनुस्वारे परसवर्णे च कृते तस्य असिद्धत्वात् न नुम् ।

# १२५. वा पदान्तस्य (८.४.५९)

- पदद्वयम् । 'अनुस्वारस्य ययि परसवर्णः' इति पूर्णम् अनुवर्तते ।
- पदान्तस्य अनुस्वारस्य – षष्ठी = पदान्ते विद्यमानस्य अनुस्वारस्य स्थाने
- ययि – सप्तमी = यय्-वर्णे परे
- परसवर्णः – प्रथमा = विधेयः = परसवर्णः आदेशः स्यात्
- वा = विकल्पेन
- पदान्तस्य अनुस्वारस्य ययि परे परसवर्णः वा स्यात् ।

- त्वम् + करोषि = त्वं करोषि (मोऽनुस्वारः) = त्वङ्करोषि / त्वं करोषि
- सम् +यन्ता = सं यन्ता (मोऽनुस्वारः ) = सयँ्यन्ता / संयन्ता
- सम् + वत्सरः = सं वत्सरः = सँव्वत्सरः / संवत्सरः
- यम् + लोकम् = यं लोकम् = यँल्लोकम् / यं लोकम्
- अत्र अनुस्वारस्य पक्षे अनुनासिकाः यवलाः ।

# १२६. मो राजि समः क्वौ (८.३.२५)

- चत्वारि पदानि । मः, राजि, समः, क्वौ ।
- 'मोऽनुस्वारः' इत्यतः 'मः' इति अनुवर्तते ।
- समः मः – षष्ठी = सम्-इत्युपसर्गस्य मकारस्य
- क्वौ राजि –सप्तमी = क्विबन्ते राज्-धातौ परे
- मः – प्रथमा = मकारः स्यात्
- क्विबन्ते राजतौ परे समो मस्य म एव स्यात् ।
- सम् + राट् = सम्राट् । 'मोऽनुस्वार' इत्यस्य अपवादः ।

# १२७. हे मपरे वा (८.३.२६)

- पदत्रयम् ।
- 'मोऽनुस्वारः' इत्यतः, 'मो राजि समः क्वौ' इत्यतः च 'मः' इति अनुवर्तते
- मः – षष्ठी = मकारस्य स्थाने
- मः – प्रथमा = मकार एव स्यात्
- मपरे हे – सप्तमी = मकारपरे हकारे
- वा = विकल्पेन
- मपरे हकारे परे मस्य म एव स्याद् वा ।
- ह्मल ह्मल चलने
- किम् + ह्मलयति = किम् ह्मलयति (हे मपरे वा) / किं ह्मलयति (मोऽनुस्वारः)

# ’यवलपरे यवला वेति वक्तव्यम्’ (वा) ।

- यवलपरके हकारे परे मस्य यवलाः वा स्युः ।

# १२८. यथासंख्यमनुदेशः समानाम् (१.३.१०)

- पदत्रयम् ।
- समसम्बन्धी विधिः यथासंख्यं स्यात् ।

- किम् + ह्यः = कियँ ह्यः / किं ह्यः
- किम् + ह्वलयति = किवँ ह्वलयति / किं ह्वलयति
- किम् + ह्लादयति = किलँ ह्लादयति / किं ह्लादयति

# १२९. नपरे नः (८.३.२७)

- पदद्वयम् ।
- 'मोऽनुस्वारः' इत्यतः 'मः' इति, 'हे मपरे वा' इत्यतः 'हे' इति, 'वा' इति च अनुवर्तते ।
- मः – षष्ठी = मकारस्य स्थाने
- नपरे हे – सप्तमी = नकारपरके हकारे परे
- नः – प्रथमा = नकारः स्यात्
- वा = विकल्पेन
- नपरे हकारे परे मस्य नः स्याद् वा ।
- किं + ह्नुते = किन् ह्नुते / किं ह्नुते

# १३०. ङ्णोः कुक्टुक् शरि (८.३.२८)

- पदत्रयम् ।
- 'हे मपरे वा' इत्यतः वा इति अनुवर्तते ।
- ङ्णोः – षष्ठी = ङकार-णकारयोः
- शरि – सप्तमी = शर्-वर्णे परे
- कुक्टुक् – प्रथमा = कुक्-टुक् इति आगमौ स्तः
- वा = विकल्पेन
- ङकार-णकारयोः कुक्-टुकौ आगमौ वा स्तः शरि ।

- यथासंख्यत्वात् ङकारस्य कुक्, णकारस्य टुक्

- कुक् = ’क्’ आगमः (’हलन्त्यम्’ इति अन्त्यककारस्य, ’उपदेशेऽजनुनासिक इत्’ इति उकारस्य च इत्संज्ञा । ’तस्य लोपः’ )
- टुक् = ’ट्’ आगमः
- उभावपि कितौ ।

- ’आद्यन्तौ टकितौ’ इति परिभाषया ङकार-णकाराभ्यां परतः आगमौ ।

- प्राङ् + षष्ठः – प्राङ् क् षष्ठः
- सुगण् + षष्ठः – सुगण् ट् षष्ठः
- कुक्-टुकोः असिद्धत्वात् जश्त्वं न । ('झलां जशोऽन्ते – ८.२.३९)

# ’चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्’ (वा)

- पौष्करसादिराचार्यः । तन्मते शरि परे चय्-वर्णानां स्थाने वर्ग-द्वितीयाः आदेशाः भवेयुः ।
- प्राङ् क् षष्ठः = प्राङ् ख् षष्ठः
- सुगण् ट् षष्ठः = सुगण् ठ् षष्ठः

- प्राङ्ख्षष्ठः / प्राङ्क्षष्ठः / प्राङ् षष्ठः
- सुगण्ठ्षष्ठः / सुगण्ट्षष्ठः / सुगण् षष्ठः